म. ग्रं. सं. ठाणें
विषय काव्य
सं. नं. ७३८
सन १८८८

2-८६
काव्य.

॥ श्री ॥

# …ःस्मरण.

हें पुस्तक

**वासुदेव मोरेश्वर पोतदार यांनीं**

आचारार्कादि ग्रंथाधारें

सुधारून

मुंबईंत "जगदीश्वर" छा॰ छा॰

विषय काव्य
लेखक वा.मो.पोतदार
सन १८८…
संग्रहालय क्रमांक ७३८
पुस्तकाचें नांव प्रातःस्मरण
७३८

श्रीगजाननप्रसन्न.



॥ श्लोक ॥

ब्राह्मेमुहूर्तेचोत्थायचिंतयेद्रघुनंदनम् ॥
श्रीपूर्वंजयमध्यस्थंद्विर्जयांतंविचक्षणः ॥ १ ॥
ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी ॥
तांकरोतिद्विजोमोहात्पादकृच्छ्रेणशुद्ध्यति ॥ २ ॥

टिप्पणी. १ श्रीरामजयरामजयजयराम हा मंत्र.

रा.ग्रं.०५ २७

श्रीगणेशाय नमः

# ॥ अथ प्रातःस्मरणम् ॥

## ॥ तत्रादौ गणपत्यादीनां मंगलम् ॥

वक्रतुंड महाकाय सूर्यकोटिसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १ ॥ गणनाथः सरस्वती रविः शुक्रो बृहस्पतिः ॥ पंचैतानि स्मरेन्नित्यं वेदवाणी प्रवर्तते ॥ २ ॥ स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम् ॥ वासरमणिरिव तमसां राशिं नाशयति विघ्नानां ॥ ३ ॥ अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम् ॥ अभिमतफलदातारं कामेशं गणपतिं वंदे ॥ ४ ॥ या कुंदेंदुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदंडमंडितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वंदिता सा

मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥५
ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं द्वंद्वातीतं
गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ॥ एकं नित्यं
विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणर-
हितं सद्गुरुं तं नमामि ॥ ६ ॥ गुरुर्ब्रह्मा गुरुर्वि-
ष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात्परब्रह्म तस्मै-
श्रीगुरवे नमः ॥ ७ ॥ नारायणं नमस्कृत्य नरं चैव
नरोत्तमं॥ देवींसरस्वतींचैवततोजयमुदीरयेत्॥८॥
मूकं करोति वाचालं पंगुं लंघयते गिरीन् ॥ य-
त्कृपा तमहं वंदे परमानंदमाधवम् ॥ ९ ॥ यं
ब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंति दिव्यैस्तवैर्वेदैः सां-
गपदक्रमोपनिषदैर्गायंति यं सामगाः ॥ ध्यानाव-
स्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्या-
न्तंन विदुः सुरासुरगणा देवाय तस्मै नमः ॥१०॥

## ॥ अथ भारतसावित्री ॥

वैशंपायन उवाच ॥ ॥ महर्षिर्भगवान्व्यासः

कृत्वेमां संहितां पुरा ॥ श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकम् ॥ १ ॥ मातापितृसहस्राणि पुत्रदारशतानि च ॥ संसारेष्वनुभूतानि यांति यास्यंति चापरे ॥ २ ॥ हर्षस्थानसहस्राणि भयस्थानशतानि च ॥ दिवसे दिवसे मूढ मा विशंति न पंडितम् ॥ ३ ॥ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ॥ धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ४ ॥ न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ॥ धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ५ ॥ इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ॥ स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥ ६ ॥ ॥ इति भारतसावित्री ॥

॥ भानोः ॥

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मंडलमृचोऽथ तनुर्यजूंषि॥सामानि यस्य किरणाः

प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपम् ॥
॥१॥प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितं च ॥वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च॥२॥प्रातर्भजामि सवितारमनंतशक्तिं पापौघशत्रुभयरोगहरं परं च ॥ तं सर्वलोककलनात्मककालमूर्तिं गोकंठबंधनविमोचनमादिदेवम् ॥ ३ ॥ श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः ॥ स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ॥ ४ ॥

## ॥ विघ्नेशस्य ॥

प्रातः स्मरामि गणनाथमनाथबंधुं सिंदूरपूरपरिशोभितगंडयुग्मम् ॥ उद्दंडविघ्नपरिखंडनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यम् ॥ १ ॥ प्रातर्नमामि चतुराननवंद्यमानमिच्छानुकूलमखिलं च वरं ददानम् ॥ तं तुंदिलं द्विरसनाप्रिययज्ञसूत्रं पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २ ॥ प्रात-

र्भजाम्यभयदं खलु भक्तशोकदावानलं गणविभुं
वरकुंजरास्यम् ॥ अज्ञानकाननविनाशनहव्यवा-
हमुत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३ ॥ श्लोकत्र-
यमिदं पुण्यं सदा साम्राज्यदायकम् ॥ प्रातरुत्थाय
सततं यः पठेत्प्रयतः पुमान् ॥ ४ ॥

॥ देव्याः ॥

प्रातः स्मरामि शरदिंदुकरोज्ज्वलाभां सद्रत्न-
वत्सकलकुंडलहारशोभाम् ॥ दिव्यायुधोर्जितसु-
नीलसहस्रहस्तां रक्तोत्पलाभचरणां भवतीं परे-
शाम् ॥ १ ॥ प्रातर्नमामि महिषासुरचंडमुंड-
शुंभासुरप्रमुखदैत्यविनाशदक्षाम् ॥ ब्रह्मेंद्ररुद्रमुनि-
मोहनशीललीलां चंडीं समस्तसुरमूर्तिमनेकरूपा
म् ॥२॥ प्रातर्भजामि भजतामभिलाषदात्रीं धात्रीं
समस्तजगतां दुरितापहंत्रीम् ॥ संसारबंधनविमो-
चनहेतुभूतां मायां परां समधिगम्य परस्य विष्णोः
॥ ३ ॥ श्लोकत्रयमिदं देव्याश्चंडिकायाः पठेन्नरः

॥ सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥४॥

## ॥ शिवस्य ॥

प्रातः स्मरामि भवभीतिहरं सुरेशं गंगाधरं वृषभवाहनमंबिकेशम् ॥ खट्वांगशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् ॥ १ ॥ प्रातर्नमामि गिरिशं गिरिजार्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम् ॥ विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोग० ॥ २ ॥ प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमनघं पुरुषं महांतम् ॥ नामादिभेदरहितं षडभावशून्यं संसार० ॥ ३ ॥ प्रातः समुत्थाय शिवं विचिंत्य श्लोकत्रयं ये ऽनुदिनं पठंति ॥ ते दुःखजातं बहुजन्मसंचितं हित्वा पदं यांति तदेव शंभोः ॥ ४ ॥

## ॥ विष्णोः ॥

प्रातः स्मरामि भवभीतिमहार्तिशांत्यै नारायणं गरुडवाहनमब्जनाभम् ॥ ग्राहाभिभूतवरवारण-

मुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥१॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविंदयुगुलं परमस्य पुंसः ॥ नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य ॥ २ ॥ प्रातर्भजामि भजतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै ॥ यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः ॥ ३ ॥ श्लोकत्रयमिदं पुण्यं प्रातःकाले पठेत्तु यः ॥ लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ ४ ॥

## ॥ राघवस्य ॥

प्रातः स्मरामि रघुनाथमुखारविंदं मंदस्मितं मधुरभाषि विशालभालम् ॥ कर्णावलंबिचलकुंडलशोभिगंडं कर्णांतदीर्घनयनं नयनाभिरामम् ॥ ॥ १ ॥ प्रातर्भजामि रघुनाथकरारविंदं रक्षोगणाय भयदं वरदं निजेभ्यः ॥ यद्राजसंसदि विभज्य महेशचापं सीताकरग्रहणमंगलमाप सद्यः ॥ २ ॥

प्रातर्नमामि रघुनाथपदारविंदं पद्मांकुशादि-
शुभरेखि सुखावहं मे ॥ योगींद्रमानसमधुव्रतसे-
व्यमानं शापापहं सपदि गौतमधर्मपत्न्याः ॥ ३ ॥
प्रातर्वदामि वचसा रघुनाथनाम वाग्दोषहारि स-
कलं शमलं करोति ॥ यत्पार्वती स्वपतिना सह
भोक्तुकामा प्रीत्या सहस्रहरिनामसमं जजाप ॥
॥४॥ प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं नीलांबु-
जोत्पलसितेतररत्ननीलाम् ॥ आमुक्तमौक्तिकवि-
शेषविभूषणाढ्यां ध्येयां समस्तमुनिभिर्जनमुक्ति-
हेतुम् ॥ ५ ॥ यः श्लोकपंचकमिदं प्रयतः पठेत्तु
नित्यं प्रभातसमये पुरुषः प्रबुद्धः ॥ श्रीरामकिंक-
रजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकम-
नन्यलभ्यम् ॥ ६ ॥

ब्रह्मादीनाम् ॥ ॥ ब्रह्मा मुरारिस्त्रिपुरांतका-
री भानुः शशी भूमिसुतो बुधश्च ॥ गुरुश्च शुक्रः
शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातम् ॥ १॥

भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ॥ रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वंतु सर्वे० ॥ २ ॥ सनत्कुमारः सनकः सनंदनः सनातनोऽप्यासुरिपिंगलौ च ॥ सप्त स्वराः सप्त रसातलानि कुर्वं० ॥ ३ ॥ सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ॥ भूरादिकृत्वा भुवनानि सप्त कुर्वं० ॥ ४ ॥ पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वायुर्ज्वलनं च तेजः ॥ नभः सशब्दं महाता सहैव कु० ॥ ५ ॥ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च नित्यम् ॥ दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् ॥ ६ ॥

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ॥ पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥ १ ॥ कर्कोटकस्य नागस्य दमयंत्या नलस्य च ॥ ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्

॥ २ ॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च वि-
भीषणः ॥ कृपः परशुरामश्च सप्तैते चिरजीविनः
॥ ३ ॥ सप्तैतान्संस्मरेन्नित्यं मार्कंडेयमथाष्टमम् ॥
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ ४ ॥ अ-
हल्या द्रौपदी सीता तारा मंदोदरी तथा ॥ पंच-
कं ना स्मरेन्नित्यं महापातकनाशनम् ॥ ५ ॥
प्रल्हादनारदपराशरपुंडरीकव्यासांबरीषशुकशौन-
कभीष्मदाल्भ्यान् ॥ रुक्मांगदार्जुनवसिष्ठविभी-
षणादीन्पुण्यानिमान्परमभागवतान्स्मरामि ॥६॥
धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रण-
श्यति वृकोदरकीर्तनेन ॥ शत्रुर्विनश्यति धनं-
जयकीर्तनेन माद्रीसुतौ कथयतां न भवंति रोगाः
॥ ७ ॥ बलिर्विभीषणो भीष्मः प्रल्हादो नारदो
ध्रुवः ॥ षडेते वैष्णवाः प्रोक्ताः स्मरणं पापनाश-
नम् ॥ ८ ॥ हरिं हरं हरिश्चंद्रं हनूमंतं हलायुध-
म् ॥ एतेषां स्मरणात्प्रातर्हानिस्तस्य न बाध्यते॥

 सं. काव्य २०१०

॥ ९ ॥ सोमनाथं वैजनाथं धन्वंतारिमथाश्विनौ ॥
॥ एतेषां स्मरणात्प्रातर्व्याधिस्तस्य न बाध्यते ॥
॥ १० ॥ अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेत-
वाहनः ॥ बीभत्सुर्विजयी कृष्णः सव्यसाची ध-
नंजयः ॥ ११ ॥ अनंतं वासुकिं शेषं पद्मनाभं
च कंबलम् ॥ शंखपालं धृतराष्ट्रं तक्षकं कालियं
तथा ॥ १२ ॥ एतानि नव नामानि नागानां च
महात्मनाम् ॥ सायंकाले पठेन्नित्यं प्रातःकाले
विशेषतः ॥ तस्य विषभयं नास्ति सर्वत्र विजयी
भवेत् ॥ १३ ॥ नारायणेति वाग्वल्ली चतुरक्षर-
पल्लवा ॥ धर्मार्थकाममोक्षाणां फलदा नात्र सं-
शयः ॥ १४ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो
धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मति-
र्मम ॥ १५ ॥ काश्यां तु भैरवो देवः संसारभय-
नाशकः ॥ अनेकजन्मकृतपापं स्मरणेन विनश्य-
ति ॥ १६ ॥ विश्वेशो जनको ह्युमा च जननी

गंगा च मातृष्वसा ढुंढीभैरवदंडपाणिसदृशा ज्ये-
ष्ठा मम भ्रातरः ॥ श्रीकाशी मणिकर्णिका च
भगिनी भार्या ममेयं मतिः सत्कर्माणि सुतास्त
एव सुहृदः काश्यां कुटुंबं मम ॥ १७ ॥ विश्वेशं
माधवं ढुंढिं दंडपाणिं च भैरवम् ॥ वंदे काशीं
गुहां गंगां भवानीं मणिकर्णिकाम् ॥ १८ ॥ का-
शिकाशीति काशीति त्रिवारं यः पठेन्नरः ॥ सो-
ऽपि देशांतरेवासी काशीवासफलं लभेत् ॥ १९ ॥
अहं काश्यां गमिष्यामि तत्रैव निवसाम्यहम् ॥
इति ब्रुवाणः सततं काशीवासफलं लभेत् ॥ २०॥
वाराणस्या दक्षिणेऽगे कुक्कुटो नाम वै द्विजः ॥
तस्य स्मरणमात्रेण दुःस्वप्नः सुस्वप्नो भवेत्॥२१॥
वाराणस्या वामभागे सुमंतुर्नाम वै द्विजः॥ तस्य
स्मरणमात्रेण निर्धनो धनवान्भवेत् ॥ २२ ॥
वाराणस्याः पूर्वभागे वसिष्ठो नाम वै द्विजः ॥
तस्य स्मरणमात्रेण अयोगो योगवान् भवेत् ॥

॥ २३ ॥ वाराणस्याः पश्चिमेंगे गौतमो नाम
वै द्विजः ॥ तस्य स्मरणमात्रेण आज्ञानो ज्ञान
वान् भवेत् ॥ २४ ॥ अयोध्या मथुरा माया
काशी कांची अवंतिका ॥ पुरी द्वारवती चैव सप्तै
ता मोक्षदायिकाः ॥ २५ ॥ अशीवरुणयोर्मध्ये
पंचक्रोशीमहत्फलम् ॥ अमरा मृत्यु मिच्छंति
का कथा त्वितरे जनाः ॥ २६ ॥ नंदिनी नलिनी
सीता मालती च मलापहा ॥ विष्णुपादाब्जसं-
भूता गंगा त्रिपथगामिनी ॥ २७ ॥ भागीरथी
भोगवती जान्हवी त्रिजटेश्वरी ॥ द्वादशैतानि
नामानि प्रातःकाले सदा पठेत् ॥ २८ ॥ शिव-
हरशंकरगौरीशं वंदे गंगाधरमीशं ॥ रुद्रं पशुपति-
मीशानं कलये काशीपुरनाथं ॥ २९ ॥ हेतवे
जगतामेव संसारार्णवसेतवे ॥ प्रभवे सर्वविद्यानां
शंभवे गुरवे नमः ॥ ३० ॥ विश्वेश्वर विरूपाक्ष
विश्वरूप सदाशिव ॥ शरणं भव भूतेश करुणा-

कर शंकर ॥ ३१ ॥ हर शंभो महादेव विश्वेशा-
मरवल्लभ ॥ शिव शंकर सर्वात्मन्नीलकंठ नमो-
स्तु ते ॥ ३२ ॥ मृत्युंजयाय रुद्राय नीलकंठाय
शंभवे ॥ अमृतेशाय शर्वाय महादेवाय ते नमः
॥ ३३ ॥ एतानि शिवनामानि यः पठेत्प्रयतः स-
कृत् ॥ नास्ति मृत्युभयं तस्य पापरोगादि किं-
चन ॥ ३४ ॥ अच्युतं केशवं रामनारायणं कृ-
ष्णदामोदरं वासुदेवं हरिम् ॥ श्रीधरं माधवं गो-
पिकावल्लभं जानकीनायकं रामचंद्रं भजे ॥ ३५ ॥
अच्युत नित्य मुकुंद मुरारे रामहरे नृहरे जग-
दीश ॥ केशव वामन माधव विष्णो कृष्ण कृ-
पालय पालय विश्वम् ॥ ३६ ॥ अनेन प्रीयतां
देवो भगवान् जानकीपतिः ॥ श्रीरामचंद्रः पूर्वेषा-
मस्माकं कुलदैवतम् ॥ ३७ ॥ वसुदेवसुतं देवं कं-
सचाणूरमर्दनम् ॥ देवकीपरमानंदं कृष्णं वंदे ज-
गद्गुरुम् ॥ ३८ ॥ यज्ञेशाच्युत गोविंद माधवा-

नंत केशव ॥ कृष्णविष्णो हृषीकेश वासुदेव नमोस्तु ते ॥३९॥ कृष्णं कमलपत्राक्षं पुण्यश्रवण कीर्तनम् ॥ वासुदेवं जगद्योनिं नौमि नारायणं हरिम् ॥ ४० ॥ कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविंदाय नमो नमः॥ ॥ ४१ ॥ गोविंद गोविंद हरे मुरारे गोविंद गोविंद रथांगपाणे ॥ गोविंद गोविंद मुकुंद कृष्ण गोविंद गोविंद नमो नमस्ते ॥ ४२ ॥ गोविंदेति सदा ध्यानं गोविंदेति सदा जपः ॥ गोविंदेति सदा स्नानं सदा गोविंदकीर्तनम् ॥ ४३ ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्माश्रिये मृदुपदे पशुपांगजाय ॥ ४४ ॥ संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यम् ॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारम् ॥ ४५ ॥

मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभो-
द्भासितांगम् ॥ पुण्योपेतं पुंडरीकायताक्षं कृ-
ष्णं वंदे सर्वलोकैकनाथम् ॥ ४६ ॥ प्राचीसंध्या
काचिदंतर्निशायाः प्रज्ञादृष्टेरंजनश्रीरपूर्वा ॥ व-
क्त्री वेदान् पातु नो वाजिवक्त्रा वागीशाख्या वा-
सुदेवस्य मूर्तिः ॥ ४७ ॥ प्रणताज्ञानसंदोहध्वां-
तध्वंसनकर्मठम् ॥ नमामि तुरगग्रीवं हरिं सार-
स्वतप्रदम् ॥ ४८ ॥ श्लोकद्वयमिदं प्रातरष्टाविंश-
तिवारकम् ॥ यः पठेत् प्रयतो नित्यं कृत्स्ना विद्या
प्रसीदति ॥ ४९ ॥ अहो भाग्यमहो भाग्यं नंद-
गोपव्रजौकसाम् ॥ यन्मित्रं परमानंदं पूर्णब्रह्म
सनातनम् ॥ ५० ॥ उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ
गरुडध्वज ॥ उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगलं
कुरु ॥ ५१ ॥ सुप्तप्रबोधितोविष्णो हृषीकेशेन
यत्त्वया ॥ यद्यत्कारयते कर्म तत्करोमि तवाज्ञया
॥ ५२ ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथवि-

ष्णो भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ ५३ ॥ जानाम्यधर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥ त्वयादिदेवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥ ५४ ॥ स्थितिः सेवा गतिर्यात्रा स्मृतिश्चिंता स्तुतिर्वचः ॥ सर्वदा भगवन्विष्णो मदीयाराधनं तव ॥ ५५ ॥ नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ॥ ५६ ॥ जिव्हे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणिद्वंद्व समर्चयाच्युतकथां श्रोत्रद्वय त्वं शृणु ॥ कृष्णं लोकय लोचनद्वय हरेर्गच्छांघ्रियुग्मालयं जिघ्र घ्राण मुकुंदपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ ५७ ॥ हे जिव्हे रससारज्ञे सर्वदा मधुरप्रिये ॥ नारायणाख्यपीयूषं पिब जिव्हे निरंतरम् ॥५८॥ मनोजवं मारुततुल्यवेगं जितेंद्रि-

यं बुद्धिमतां वरिष्ठम् ॥ वातात्मजं वानरयूथमु-
ख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ ५९ ॥

इति तथा गजेंद्रमोक्षादि च पठित्वा स्वेष्टदेवतां स्मरेत् ॥

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ॥
करमूले तु गोविंदः प्रभाते करदर्शनम् ॥ १ ॥

इति स्वहस्तं निरिक्ष्य ॥

समुद्रवसने देवि पर्वतस्तनमंडले ॥ विष्णु-
पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥

इति भूमिं संप्राथ्योत्थाय रविं गुरुं च नमस्कृत्य
गवादिमंगलानिपश्येत् ॥

॥ इति प्रातःस्मरणम् ॥

## ॥ अथ गंगाष्टक प्रारंभः ॥

श्रीगणेशाय नमः ॥ मातः शैलसुतासपत्नि वसु
धाशृंगारहारावलि स्वर्गारोहणवैजयंति भवतीं
भागीरथीं प्रार्थये ॥ त्वत्तीरे वसतस्त्वदंबुपिबत
स्त्वद्वीचिषु प्रेंखतस्त्वन्नामस्मरतस्त्वदर्पितदृशः
स्यान्मे शरीरव्ययः ॥ १ ॥ त्वत्तीरे तरुकोटरांतर-

गतो गंगे विहंगो वरं त्वन्नीरे नरकांतकारिणि वरं मत्स्यो ऽथवा कच्छपः ॥ नैवान्यत्र मदांधसिंधुरघटासंघट्टघंटारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २ ॥ उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वा वाराणस्यां जननमरणक्लेशदुःखासहिष्णुः ॥ न त्वन्यत्र प्रविरलरणत्कंकणक्काणमिश्रं वारस्त्रीभिश्चमरमरुतावीजितो भूमिपालः ॥ ३ ॥ काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुंठितं स्रोतोभिश्चलितं तटांबुलुलितं वीचिभिरांदोलितं ॥ दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानः कदा द्रक्ष्ये हं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥ ४ ॥ अभिनवबिसवल्ली पादपद्मस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ॥ जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलंका जान्हवी नः पुनातु ॥ ५ ॥ एतत्तालतमालसालसरलव्यालोलवल्लीलताच्छन्नं सूर्यकरप्रता-

परहितं शंखेंदुकुंदोज्ज्वलं ॥ गंधर्वामरासिद्धकिन्नर
वधूत्तुंगस्तनास्फालितं स्नानाय प्रतिवासरं भव-
तु मे गांगं जलं निर्मलं ॥ ६ ॥ गांगं वारि मनो-
हारि मुरारिचरणच्युतम् ॥ त्रिपुरारिशिरश्चारि
पापहारि पुनातु मां ॥ ७ ॥ पापापहारि दुरिता-
रि तरंगधारि शैलप्रचारि गिरिराजगुहाविदारि ॥
झंकारकारि हरिपादरजोपहारि गांगं पुनातु सततं
शुभकारि वारि ॥ ८ ॥ गंगाष्टकं पठति यः प्रयतः
प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः ॥
प्रक्षाल्य गात्रकलिकल्मषपंकमाशु मोक्षं लभेत्प-
तति नैव नरो भवाब्धौ ॥ ९ ॥ ॥ इति श्रीवा-
ल्मीकिना विरचितं गंगाष्टकस्तोत्रं संपूर्णम् ॥

## ॥ अथ प्रातःस्मरणस्तोत्रप्रारंभः ॥

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं
परमहंसगतिं तुरीयम् ॥ यत्स्वप्नजागरसुषुप्तमवैति
नित्यं तद्ब्रह्म निष्कलमहं न च भूतसंघः ॥ १ ॥ प्रा-

तर्भजामि मनसो वचसामगम्यं वाचो विभाति निखिला यदनुग्रहेण ॥ यन्नेति नेति वचनैर्निगमा अवोचंस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥२॥ प्रातर्नमामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यं ॥ यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वां भुजंगम इव प्रतिभासितं वै ॥ ३ ॥ श्लोकत्रय मिदं पुण्यं लोकत्रयविभूषणम् ॥ प्रातःकाले पठेद्यस्तु सगच्छेत्परमं पदं ॥ ४ ॥ ॥ इति श्रीभगवत्पादाचार्यविरचितं प्रातःस्मरणस्तोत्रं संपूर्णम्

## ॥ अथ प्रज्ञावर्धनस्तोत्रम् ॥

स्कंद उवाच॥योगीश्वरो महासेनः कार्तिकेयोऽग्निनंदनः ॥ स्कंदः कुमारः सेनानीः स्वामी शंकरसंभवः ॥ १ ॥ गांगेयश्चंद्रचूडश्च ब्रह्मचारी शिखिध्वजः ॥ तारकारिरुमापुत्रः क्रौंचारातिः षडाननः ॥ २ ॥ शब्दब्रह्मसमुद्रस्थः सिद्धः सारस्वतो गुहः ॥ सनत्कुमारो भगवान् भोगमोक्षप्रदः प्रभुः ॥३॥ शरज-

न्मा गणाधीशपूर्वजो मुक्तिमार्गकृत्॥सर्वागमप्रणे
ता च वांछितार्थप्रदायकः॥४॥त्रिंशदेतानि नामा
नि प्रज्ञाकारीणि यः पठेत् ॥ प्रत्यूषे श्रद्धया युक्तो
मूको वाचस्पतिर्भवेत् ॥ ५ ॥ महामंत्रमयानीति
मम नामानि कीर्तयेत् ॥ महाप्रज्ञामवाप्नोति नात्र
कार्या विचारणा ॥ ६ ॥ ॥ इति श्रीस्कंदपुराणे
प्रज्ञावर्धनस्तोत्रं संपूर्णं ॥ ॥ छ ॥ ॥ छ ॥

## अथ गजेंद्रमोक्ष.

गजा दे जो मुक्ति त्वरित विभु नक्रासि दमुनी
मुनी ज्याला शास्त्रीं हरि ह्मणति त्यालाचि नमुनी
॥कथा ते संक्षेपें कथिन वरि पक्षींद्रगमना मनाम-
ध्यें ध्यात द्विरदवरदा दुःखशमना ॥ १ ॥ जळीं
दांतें नक्र द्विरदपदमांसास्थि उकरी करी प्राण
त्यागी सुमति सुचली तों झडकरी ॥ करी धांवा
कीं हो सुलभवर जो देवनिकरीं करीं घे अर्पाया
कमल पदपद्मीं सुखकरीं ॥ २ ॥ नसे ठावा ब्रह्मा

न शिव अथवा श्रीपति हरी हरी जो तांपातें उचलुनि कृपासिंधुलहरी ॥ हरी वाटे काळा करिस विपती मृत्युभुजगा जगाचा तूं ऐसा धनि कवण तो पाव मज गा ॥ ३ ॥ करी धांवा दुःखी ह्मणुनि न कळे देवनिकरा करावा तो मुक्त स्वशरण गमे श्रीप्रियकरा ॥ करा चक्राशस्त्रासह उचलुनीयां खगमनीं मनीं साक्षी तो ये गज जलज घे तो स्वनमनीं ॥ ४ ॥ असा मी सर्वात्मा त्रिदशनिकरा वंद्य सकळां कळाया हें ये त्यासह करि तया मुक्ति विकळा ॥ कळा प्रेतप्राया करिस मरणा ते न अवधी वधी नक्रातें त्या अवसरिं कृपाब्धी निरवधी ॥ ५ ॥ मृताच्या त्या तोंडामधुनि पद तोही झडकरी करीतें वोढेना प्रभुचि करुणा मागुति करी ॥ करीं त्या पायातें धरुनि उचली श्रीसुखकरीं करींद्रा वैकुंठीं ह्मणुनि गति दे मुक्ति निकरीं ॥ ६ ॥ भुजा चाऱ्ही पीतांबरधर असी मूर्त्ति बरवी रवी

जाणो हातीं रथचरण तें दीप्ति मिरवी ॥ गदा एवे
हस्तें जलजयुग दोन्हीं शुभकरीं करींद्रा सारूप्य
त्वरित गति दे देवनिकरीं ॥ ७ ॥ स्तवी ब्रह्मा शंभु
त्रिदशपति तो मुक्तहि नवा नवां भक्तींची ही गति
दिधलि त्याला अभिनवा ॥ न वाटे त्यां सर्वां
हरिविण धनी आणिक जगा जगाया हे भक्ति प्रभु
मग ह्मणे त्यास मज गा ॥ ८ ॥ वदे तेव्हां सर्वां
द्विरदवरद श्रीपति असा असारीं संसारीं गजगति
असी गातचि असा ॥ पहांटे हें गाय प्रतिदिनिं-
हि माझें चरित रे तरे दुःखाब्धी तो न परमपदीं-
हूनि उतरे ॥ ९ ॥ गजाची हे मुक्ति क्रमुनि इतरां
शांतिरजनीं जनी गाती त्यांला फळ परम या
विष्णुभजनीं ॥ जनीं भक्तस्वामी करि भजक हो
गातचि असा असारीं या सारा ह्मणुनि विनवी
वामन असा ॥ १० ॥ इति श्रीगजेंद्रमोक्ष समाप्त॥

समाप्त.

# अथ द्वादशज्योतिर्लिंगनामानि.

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ॥ उ-
ज्जयिन्यां महाकालमोंकारममलेश्वरम् ॥ १ ॥
पर्ल्यां वैजनाथं च डाकिन्यां भीमशंकरम् ॥
सेतुबंधे तु रामेशं नागेशं दारुकावने ॥ २ ॥
वाराणस्यां तु विश्वेशं त्र्यंबकं गौतमीतटे ॥ हि-
मालये तु केदारं घृष्णेशं तु शिवालये ॥ ३ ॥ एता
नि ज्योतिर्लिंगानि प्रातरुत्थाय यः पठेत् ॥ ब्रह्म
हत्यादिकं तस्य नश्यत्येव न संशयः ॥ ४ ॥ इति ॥

वाराणसीपुरपते भज विश्वनाथा माझा प्रणाम
तुझिया चरणासि आतां ॥ मी मागतों परमपाव-
न पुण्यभिक्षा द्यावी मला त्वरितशांभवी वेददी
क्षा ॥ १ ॥ श्रीधुंडिराज गणनायक दंडपाणीमाझे
उद्दंड अपराध मनांत नाणीं॥ श्री[illegible]चुकवि रौ-
रवयातना रे वाराणसींत मज ठीं[illegible]रे ॥ २

समाप्त.

# सूचना.

या पुस्तकांत खालीं लिहिल्याप्रमाणें विषय असून हें चांगलें शुद्ध केलें आहे.

१ मंगलश्लोक.
२ भारतसावित्री.
३ सूर्यस्मरण.
४ गणपतिस्मरण.
५ देवीस्मरण.
६ शिवस्मरण.
७ विष्णुस्मरण.
८ रामस्मरण.
९ब्रह्मदेवादिदेवतास्मरण.
१० पुण्यश्लोकस्मरण.
११ कलिनाशकस्मरण.
१२ सप्तचिरंजीवस्मरण.
१३ पंचकन्यास्मरण.
१४ भागवतस्मरण.
१५ पांडवस्म[illegible]
१६ [illegible] असा ॥ [illegible]
१[illegible] [illegible]वतास्म
१८ व्याधिनिवारकदेवता-
स्मरण.
१९ अर्जुनदशनामस्मरण.
२० विषभयनिवारकअनंता-
दिनवनामस्मरण.
२१ काशीक्षेत्रस्थकाशीवि-
श्वेश्वरादिस्मरण.
२२नारायणस्मरण.[वमंगल
२३ सर्वविद्यादायकहय[illegible]-
२४ भगवत्प्रार्थना.
२५ स्वकीयेंद्रियप्रार्थना.
२६ मारुतिवंदन.
२७ भूमिप्रार्थना.
२८ गंगाष्टक.
२९ प्रज्ञावर्धनस्तोत्र.
३० प्रातःस्मरणस्तोत्र.
३१ प्राकृतगजेंद्रमोक्ष.
३२ द्वादशज्योतिर्लिंगस्तो०